# Brihat Parashara Horashastram 1-10

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૧-૧૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 1-10

File name : par0110.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve, Ginda Lass, Abhisyanta Tejaswi

Latest update : December 22, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Brihat Parashara Horashastram 1-10

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૧-૧૦

॥ ૐ ॥

શ્રીગણેશાય નમઃ ॥

અથ બૃહત્પારાશરહોરાશાસ્ત્રમ્ ॥

ગજાનનં ભૂતગણાદિસેવિતં કપિત્થજમ્બૂફલસારભક્ષણમ્ ।
ઉમાસુતં શોકવિનાશકારણં નમામિ વિઘ્નેશ્વરપાદપઙ્કજમ્ ॥

## સૃષ્ટિક્રમકથનાધ્યાયઃ ॥ ૧॥

અથૈકદા મુનિશ્રેષ્ઠં ત્રિકલજ્ઞં પરાશરમ્ ।
પપ્રચ્છોપેત્ય મૈત્રેયઃ પ્રણિપત્ય કૃતાઞ્જલિઃ ॥ ૧॥

ભગવન્ પરમં પુણ્યં ગુહ્યં વેદાઙ્ગમુત્તમમ્ ।
ત્રિસ્કન્ધં જ્યૌતિષં હોરા ગણિતં સંહિતેતિ ચ ॥ ૨॥

એતેષ્વપિ ત્રિષુ શ્રેષ્ઠા હોરેતિ શ્રૂયતે મુને ।
ત્વત્તસ્તાં શ્રોતુમિચ્છામિ કૃપયા વદ મે પ્રભો ॥ ૩॥

કથં સૃષ્ટિરિયં જાતા જગતશ્ચ લયઃ કથમ્ ।
ખસ્થાનાં ભૂસ્થતાનાં ચ સમ્બન્ધં વદ વિસ્તરાત્ ॥ ૪॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર લોકાનુગ્રહકારિણા ।
અથાહં પરમં બ્રહ્મ તચ્છક્તિં ભારતીં પુનઃ ॥ ૫॥

સૂર્યં નત્વા ગ્રહપતિં જગદુત્પત્તિકારણમ્ ।
વક્ષ્યામિ વેદનયનં યથા બ્રહ્મમુખાચ્છ્રુતમ્ ॥ ૬॥

શાન્તાય ગુરુભક્તાય સર્વદા સત્યવાદિને ।
આસ્તિકાય પ્રદાતવ્યં તતઃ શ્રેયો હ્યવાપ્સ્યતિ ॥ ૭॥

ન દેયં પરશિષ્યાય નાસ્તિકાય શઠાય વા ।
દત્તે પ્રતિદિનં દુઃખં જાયતે નાત્ર સંશયઃ ॥ ૮॥

એકોઽવ્યક્તાત્મકો વિષ્ણુરનાદિઃ પ્રભુરીશ્વરઃ ।
શુદ્ધસત્વો જગત્સ્વામી નિર્ગુણસ્ત્રિગુણાન્વિતઃ ॥ ૯॥

સંસારકારકઃ શ્રીમાન્નિમિત્તાત્મા પ્રતાપવાન્ ।
એકાંશેન જગત્સર્વં સૃજત્યવતિ લીલયા ॥ ૧૦॥

ત્રિપાદં તસ્ય દેવસ્ય હ્યમૃતં તત્ત્વદર્શિનઃ ।
વિદન્તિ તત્પ્રમાણં ચ સપ્રધાનં તથૈકપાત્ ॥ ૧૧॥

વ્યક્તાવ્યક્તાત્મકો વિષ્ણુર્વાસુદેવસ્તુ ગીયતે ।
યદવ્યક્તાત્મકો વિષ્ણુઃ શક્તિતદ્વયસમન્વિતઃ ॥ ૧૨॥

વ્યક્તાત્મકસ્ત્રિભિર્યુક્તઃ કથ્યતેઽનન્તશક્તિમાન્ ।
સત્ત્વપ્રધાના શ્રીશક્તિર્ભૂશક્તિશ્ચ રજોગુણા ॥ ૧૩॥

શક્તિસ્તૃતીયા યા પ્રાક્તા નીલાખ્યા ધ્વાન્તરૂપિણી ।
વાસુદેવશ્ચતુર્થોઽભૂચ્છ્રીશક્ત્યા પ્રેરિતો યદા ॥ ૧૪॥

સઙ્કર્ષણશ્ચ પ્રદ્યુમ્નોઽનિરુદ્ધ ઇતિ મૂર્તિધૃક્ ।
તમઃશક્ત્યાઽન્વિતા વિષ્ણુર્દેવઃ સઙ્કર્ષણાભિધઃ ॥ ૧૫॥

પ્રદ્યુમ્નો રજસા શક્ત્યાઽનિરુદ્ધઃ સત્ત્વયા યુતઃ ।
મહાન્ સઙ્કર્ષણાજ્જાતઃ પ્રદ્યુમ્નાદ્યદહઙ્કૃતિઃ ॥ ૧૬॥

અનિરુદ્ધાત્ સ્વયં જાતો બ્રહ્માહઙ્કાકમૂર્તિધૃક્ ।
સર્વેષુ સર્વશક્તિશ્ચ સ્વશક્ત્યાઽધિકયા યુતઃ ॥ ૧૭॥

અહઙ્કારસ્ત્રિધ ભૂત્વા સર્વમેતદ્વિસ્તરાત્ ।
સાત્ત્વિકો રાજસશ્ચૈવ તામસશ્ચેદહઙ્કૃતિઃ ॥ ૧૮॥

દેવા વૈકારિકાજ્જાતાસ્તૈજસાદિન્દ્રિયાણિ ચ ।
તામસચ્ચૈવભૂ તાનિ ખાદીનિ સ્વસ્વશક્તિભિઃ ॥ ૧૯॥

શ્રીશક્ત્યા સહિતો વિષ્ણુઃ સદા પાતિ જગત્ત્રયમ્ ।
ભૂશક્ત્યા સૃજતે બ્રહ્મા નીલશક્ત્યા શિવોઽત્તિ હિ ॥ ૨૦॥

સર્વેષુ ચૈવ જીવેષુ પરમાત્મા વિરાજતે ।
સર્વં હિ તદિદં બ્રહ્મન્ સ્થિતં હિ પરમાત્મનિ ॥ ૨૧॥

સર્વેષુ ચૈવ જીવેષુ સ્થિતંહ્યંશદ્વયં ક્વચિત્ ।
જીવાંશો હ્યધિકસ્તદ્વત્ પરમાત્માંશકઃ કિલ ॥ ૨૨॥

સૂર્યાદયો ગ્રહાઃ સર્વે બ્રહ્મકામદ્વિષાદયઃ ।
એતે ચાન્યે ચ બહવઃ પરમાત્માંશકાધિકાઃ ॥ ૨૩॥

શક્તયશ્ચ તથૈતેષામધિકાંશાઃ શ્રિયાદયઃ ।
સ્વસ્વશક્તિષુ ચાન્યાસુ જ્ઞેયા જીવાંશકાધિકાઃ ॥ ૨૪॥

## અથાવતારકથનાધ્યાયઃ ॥ ૨॥

રામકૃષ્ણાદયો યે ચ હ્યવતારા રમાપતેઃ ।
તેઽપિ જીવાંશસંયુક્તાઃ કિંવા બ્રૂહિ મુનીશ્વર ॥ ૧॥

રામઃ કૃષ્ણશ્ચ ભો વિપ્ર નૃસિંહઃ સૂકરસ્તથા ।
એતે પૂર્ણાવતારાશ્ચ હ્યન્યે જીવાંશકાન્વિતાઃ ॥ ૨॥

અવતારાણ્યનેકાનિ હ્યજસ્ય પરમાત્મનઃ ।
જીવાનાં કર્મફલદો ગ્રહરૂપી જનાર્દનઃ ॥ ૩॥

દૈત્યાનાં બલનાશાય દેવાનાં બલવૃદ્ધયે ।
ધર્મસંસ્તાપનાર્થાય ગ્રહાજ્જાતાઃ શુભાઃ ક્રમાત્ ॥ ૪॥

રામોઽવતારઃ સૂર્યસ્ય ચન્દ્રસ્ય યદુનાયકઃ ।
નૃસિંહો ભૂમિપુત્રસ્ય બુદ્ધઃ સોમસુતસ્ય ચ ॥ ૫॥

વામનો વિબુધેજ્યસ્ય ભાર્ગવો ભાર્ગવસ્ય ચ ।
કૂર્મો ભાસ્કરપુત્રસ્ય સૈંહિકેયસ્ય સૂકરઃ ॥ ૬॥

કેતોર્મીનાવતારશ્ચ યે ચાન્યે તેઽપિ ખેટજાઃ ।
પરાત્માંશોઽધિકો યેષુ તે સર્વે ખેચરાભિધાઃ ॥ ૭॥

જીવાંશોહ્યધિકો યેષુ જીવાસ્તે વૈ પ્રકીર્તિતાઃ ।
સૂર્યાદિભ્રો ગ્રહેભ્યશ્ચ પરમાત્માંશનિઃસૃતાઃ ॥ ૮॥

રામકૃષ્ણાદયઃ સર્વ હ્યવતારા ભવન્તિ વૈ ।
તત્રૈવ તે વિલીયન્તે પુનઃ કાર્યોત્તર સદા ॥ ૯॥

જીવાંશનિઃસૃતાસ્તેષાં તેભ્યો જાતા નરાદયઃ ।
તેઽપિ તત્રૈવ લીયન્તે તેઽવ્યક્તે સમયન્તિ હિ ॥ ૧૦॥

ઇદં તે કથિતં વિપ્ર સર્વં યસ્મિન્ ભવેદિતિ ।
ભૂતાન્યપિ ભવિષ્યન્તિ તત્તજ્જાતન્તિ તદ્વિદઃ ॥ ૧૧॥

વિના તજ્જ્યૈતિષં નાન્યો જ્ઞાતું શક્નોતિ કર્હિચિત્ ।
તત્માદવશ્યમધ્યેયં બ્રાહ્મણેશ્ચ વિશેષતઃ ॥ ૧૨॥

યો નરઃ શાસ્ત્રમજ્ઞાત્વા જ્યૌતિષં ખલુ નિન્દતિ ।
રૌરવં નરકં ભુક્ત્વા ચાન્ધત્વં ચાન્યજન્મનિ ॥ ૧૩॥

## અથ ગ્રહગુણસ્વરૂપાધ્યાયઃ ॥ ૩॥

કથિતં ભવતા પ્રેમ્ણા ગ્રહાવતરણં મુને ।
તેષાં ગુણસ્વરૂપાદ્યં કૃપયા કથ્યતાં પુનઃ ॥ ૧॥

શ્ૃણુ વિપ્ર પ્રવક્ષ્યામિ ભગ્રહાણાં પરિસ્થિતિમ્ ।
આકાશે યાનિ દૃશ્યન્તે જ્યોતિર્બિમ્બાન્યનેકશઃ ॥ ૨॥

તેષુ નક્ષત્રસઙ્જ્ઞાનિ ગ્રહસઙ્જ્ઞાનિ કાનિચિત્ ।
તાનિ નક્ષત્રનામાનિ સ્થિરસ્થાનાનિ યાનિ વૈ ॥ ૩॥

ગચ્છન્તો ભાનિ ગૃહ્ણન્તિ સતતં યે તુ તે ગ્રહાઃ ।
ભચક્રસ્ય નગાશ્વ્યંશા અશ્વિન્યાદિસમાહ્વયાઃ ॥ ૪॥

તદ્દ્વાદશવિભાગાસ્તુ તુલ્યા મેષાદિસઙ્જ્ઞકાઃ ।
પ્રસિદ્ધા રાશયઃ સન્તિ ગ્રહાસ્ત્વર્કાદિસઙ્જ્ઞકાઃ ॥ ૫॥

રાશીનામુદયો લગ્નં તદ્વશાદેવ જન્મિનામ્ ।
ગ્રહયોગવિયોગાભ્યાં ફલં ચિન્ત્યં શુભાશુભમ્ ॥ ૬॥

સઙ્જ્ઞા નક્ષત્રવૃન્દાનાં જ્ઞેયાઃ સામાન્યશાસ્ત્રતઃ ।
એતચ્છાસ્ત્રાનુસારેણ રાશિખેટફલં બ્રુવે ॥ ૭॥

યસ્મિન્ કાલે યતઃ ખેટા યાન્તિ દૃગ્ગણિતૈકતામ્ ।
તત એવ સ્ફુટાઃ કાર્યાઃ દિક્કાલૌ ચ સ્ફુટૌ વિદા ॥ ૮॥

સ્વસ્વદેશોદ્ભવૈઃ સાધ્યં લગ્નં રાશ્યુદયૈઃ સ્ફુટમ્ ।

અથાદૌ વચ્મિ ખેટાનાં જાતિરૂપગુણાનહમ્ ॥ ૯॥

અથ ખેટા રવિશ્ચન્દ્રો મઙ્ગલશ્ચ બુધસ્તથા ।
ગુરુઃ શુક્રઃ શની રાહુઃ કેતુશ્ચૈતે યથાક્રમમ્ ॥ ૧૦॥

તત્રાર્કશનિભૂપુત્રાઃ ક્ષીણેન્દુરાહુકેતવઃ ।
ક્રૂરાઃ શેષગ્રહા સૌમ્યાઃ ક્રૂરઃ ક્રૂરયુતો બુધઃ ॥ ૧૧॥

સર્વાત્મા ચ દિવાનાથો મનઃ કુમુદબાન્ધવઃ ।
સત્ત્વં કુજો બુધૈઃ પ્રોક્તો બુધો વાણીપ્રદાયકઃ ॥ ૧૨॥

દેવેજ્યો જ્ઞાનસુખદો ભૃગુર્વીર્યપ્રદયકઃ ।
ઋષિભિઃ પ્રાક્તનૈઃ પ્રોક્તશ્છાયાસૂનુશ્ચ દુઃખદઃ ॥ ૧૩॥

રવિચન્દ્રૌ તુ રાજાનૌ નેતા જ્ઞેયો ધરાત્મજઃ ।
બુધો રાજકુમારશ્ચ સચિવૌ ગુરુભાર્ગવૌ ॥ ૧૪॥

પ્રેષ્યકો રવિપુત્રશ્ચ સેના સ્વર્ભાનુપુચ્છકૌ ।
એવં ક્રમેણ વૈ વિપ્ર સૂર્યાદીન્ પ્રવિચિન્તયેત્ ॥ ૧૫॥

રક્તશ્યામો દિવાધીશો ગૌરગાત્રો નિશાકરઃ ।
નાત્યુચ્ચાઙ્ગઃ કુજો રક્તો દૂર્વાશ્યામો બુધસ્તથા ॥ ૧૬॥

ગૌરગાત્રો ગુરુર્જ્ઞેયઃ શુક્રઃ શ્યાવસ્તથૈવ ચ ।
કૃષ્ણદેહો રવેઃ પુત્રો જ્ઞાયતે દ્વિજસત્તમ ॥ ૧૭॥

વહ્ન્યમ્બુશિખિજા વિષ્ણુવિડૌજઃ શચિકા દ્વિજ ।
સૂર્યાદીનાં ખગાનાં ચ દેવા જ્ઞેયાઃ ક્રમેણ ચ ॥ ૧૮॥

ક્લીવૌ દ્વૌ સૌમ્યસૌરી ચ યુવતીન્દુભૃગૂ દ્વિજ ।
નરાઃ શેષાશ્ચ વિજ્ઞેયા ભાનુર્ભૌમો ગુરુસ્તથા ॥ ૧૯॥

અગ્નિભૂમિનભસ્તોયવાયવઃ ક્રમતો દ્વિજ ।
ભૌમાદીનાં ગ્રહાણાં ચ તત્ત્વાનીતિ યથાક્રમમ્ ॥ ૨૦॥

ગુરુશુક્રૌ વિપ્રવર્ણૌ કુજાર્કૌ ક્ષત્રિયૌ દ્વિજ ।
શશિસોમ્યૌ વૈશ્યવર્ણૌ શનિઃ શૂદ્રો દ્વિજોત્તમ્ ॥ ૨૧॥

જીવસૂર્યેન્દ્રવઃ સત્ત્વં બુધશુક્રૌ રજસ્તથા ।
સૂર્યપુત્રભરાપુત્રૌ તમઃપ્રકૃતિકૌ દ્વિજ ॥ ૨૨॥

મધુપિઙ્ગલદૃક્સૂર્યશ્ચતુરસ્રઃ શુચિર્દ્વિજ ।
પિત્તપ્રકૃતિકો ધીમાન્ પુમાનલ્પકચો દ્વિજ ॥ ૨૩॥

બહુવાતકફઃ પ્રાજ્ઞશ્ચન્દ્રો વૃત્તતનુર્દ્વિજ ।
શુભદૃઙ્મધુવાક્યશ્ચ  ચઞ્ચલો મદનાતુરઃ ॥ ૨૪॥

ક્રૂરો રક્તેક્ષણો  ભૌમશ્ચપલોદારમૂર્તિકઃ ।
પિત્તપ્રકૃતિકઃ ક્રોધી કૃશમધ્યતનુર્દ્વિજ ॥ ૨૫॥

વપુઃશ્રેષ્ઠઃ શ્લિષ્ટવાક્ચ હ્યતિહાસ્યરુચિર્બુધઃ ।
પિત્તવાન્ કફવાન્ વિપ્ર મારુતપ્રકૃતિસ્તથા ॥ ૨૬॥

બૃહદ્ગાત્રો ગુરુશ્ચૈવ પિઙ્ગલો મૂર્દ્ધજેક્ષણે ।
કફપ્રકૃતિકો ધીમાન્ સર્વશાસ્ત્રવિશારદઃ ॥ ૨૭॥

સુખિ કાન્તવપુ શ્રેષ્ઠઃ સુલોચનો ભૃગોઃ સુતઃ ।
કાવ્યકર્તા કફાધિક્યોઽનિલાત્મા વક્રમૂર્ધજઃ ॥ ૨૮॥

કૃશદીર્ઘતનુઃ શૌરિઃ પિઙ્ગદૃષ્ટ્યનિલાત્મકઃ ।
સ્થૂલદન્તોઽલસઃ પઙ્ગુઃ ખરરોમકચો દ્વિજ ॥ ૨૯॥

ધૂમ્રાકારો નીલતનુર્વનસ્થોઽપિ ભયઙ્કરઃ ।
વાતપ્રકૃતિકો ધીમાન્ સ્વર્ભાનુસ્તત્સમઃ શિખી ॥ ૩૦॥

અસ્થિ રક્તસ્તથા મજ્જા ત્વગ્ વસા વીર્યમેવ ચ ।
સ્નાયુરેષામધીશાશ્ચ ક્રમાત્ સૂર્યાદયો દ્વિજ ॥ ૩૧॥

દેવાલયજલં વહ્નિક્રીડાદીનાં તથૈવ ચ ।
કોશશય્યોત્કરાણાન્તુ નાથાં સૂર્યાદયઃ ક્રમાત્ ॥ ૩૨॥

અયનક્ષણવારર્તુમાસપક્ષસમા દ્વિજ ।
સૂર્યાદીનાં ક્રમાજ્જ્ઞેયા નિર્વિશઙ્કં દ્વિજોત્તમ ॥ ૩૩॥

કટુક્ષારતિક્તમિશ્રમધુરામ્લકષાયકાઃ ।
ક્રમેણ સર્વે વિજ્ઞેયાઃ સૂર્યાદીનાં રસા ઇતિ ॥ ૩૪॥

બુધેજ્યૌ બલિનૌ પૂર્વે રવિભૌમૌ ચ દક્ષિણે ।
પશ્ચિમે સૂર્યપુત્રશ્ચ સિતચન્દ્રૌ તથોત્તરે ॥ ૩૫॥

નિશાયાં બલિનશ્ચન્દ્રકુજસૌરા ભવન્તિ હિ ।
સર્વદા જ્ઞો બલી જ્ઞેયો દિને શેષા દ્વિજોત્તમ ॥ ૩૬॥

કૃષ્ણે ચ બલિનઃ ક્રૂરાઃ સૌમ્યા વીર્યયુતાઃ સિતે ।
સૌમ્યાયને સૌમ્યખેટો બલી યામ્યાયનેઽપરઃ ॥ ૩૭॥

વર્ષમાસાહહોરાણાં પતયો બલિનસ્તથા ।
શમમ્બુગુશુચંરાદ્યા વૃદ્ધિતો વીર્યવત્તરઃ ॥ ૩૮॥

સૂર્યે જનયતિ સ્થૂલાન્ દુર્ભગાન્ સૂર્યપુત્રકઃ ।
ક્ષીરોપેતાંસ્તથા ચન્દ્રઃ કટુકાદ્યાન્ ધરાસુતઃ ॥ ૩૯॥

પુષ્પવૃક્ષં ભૃગોઃ પુત્રો ગુરુજ્ઞૌ સફલાફલૌ ।
નીરસાન્ સૂર્યપુત્રશ્ચ એવં જ્ઞેયાઃ ખગા દ્વિજ ॥ ૪૦॥

રાહુશ્ચાણ્ડાલજાતિશ્ચ કેતુર્જાત્યન્તરસ્તથા ।
શિખિસ્વર્ભાનુમન્દાનાં વલ્મીકઃ સ્થાનમુચ્યતે ॥ ૪૧॥

ચિત્રકન્થા ફનીન્દ્રસ્ય કેતુશ્છિદ્રયુતો દ્વિજ! ।
સીસં રહોર્નીલમણિઃ કેતોર્જ્ઞેયો દ્વિજોત્તમ ॥ ૪૨॥

ગુરોઃ પીતામ્બરં વિપ્ર ભૃગોઃ ક્ષૌમં તથૈવ ચ ।
રક્તક્ષૌમં ભાસ્કરસ્ય ઇન્દોઃ ક્ષૌમં સિતં દ્વિજ ॥ ૪૩॥

બુધસ્ય કૃષ્ણક્ષૌમં તુ રક્તવસ્ત્રં કુજસ્ય ચ ।
વસ્ત્રં ચિત્રં શનેર્વિપ્ર પટ્ટવસ્ત્રં તથૈવ ચ ॥ ૪૪॥

ભૃગોરૃતુર્વસન્તશ્ચ કુજભાન્વોશ્ચ ગ્રીષ્મકઃ ।
ચન્દ્રસ્ય વર્ષા વિજ્ઞેયા શરચ્ચૈવ તથા વિદઃ ॥ ૪૫॥

હેમન્તોઽપિ ગુરોર્જ્ઞેયઃ શનેસ્તુ શિશિરો દ્વિજ ।
અષ્ટૌ માસાશ્ચ સ્વર્ભાનોઃ કેતોર્માસત્રયં દ્વિજ ॥ ૪૬॥

રાહ્વારપઙ્ગુચન્દ્રશ્ચ વિજ્ઞેયા ધાતુખેચરાઃ ।
મૂલગ્રહૌ સૂર્યશુક્રૌ અપરા જીવસઙ્જ્ઞકાઃ ॥ ૪૭॥

ગ્રહેષુ મન્દો વૃદ્ધોઽસ્તિ આયુર્વૃદ્ધિપ્રદાયકઃ ।
નૈસર્ગિકે બહુસમાન્ દદાતિ દ્વિજસત્તમ ॥ ૪૮॥

મેષો વૃષો મૃગઃ કન્યા કર્કો મીનસ્તથા તુલા ।
સૂર્યાદીનાં ક્રમાદેતે કથિતા ઉચ્ચરાશયઃ ॥ ૪૯॥

ભાગા દશ ત્રયોઽષ્ટાશ્ચ્યસ્તિથ્યોઽક્ષા ભમિતા નખાઃ ।

ઉચ્ચાત્ સપ્તમભં નીચં તૈરેવાંશૈઃ પ્રકીર્તિતમ્ ॥ ૫૦॥

રવેઃ સિમ્હે નખાંશાશ્ચ ત્રિકોણમપરે સ્વભમ્ ।
ઉચ્ચમિન્દોર્વૃષે ત્ર્યંશાસ્ત્રિકોણમપરેંઽશકાઃ ॥ ૫૧॥

મેષેઽર્કાંશાસ્તુ ભૌમસ્ય ત્રિકોણમપરે સ્વભમ્ ।
ઉચ્ચં બુધસ્ય કન્યાયામુક્તં પઞ્ચદશાંશકાઃ ॥ ૫૨॥

તતઃ પઞ્ચાંશકાઃ પ્રોક્તં ત્રિકોણમપરે સ્વભમ્ ।
ચાપે દશાંશા જીવસ્ય ત્રિકોણમપરે સ્વભમ્ ॥ ૫૩॥

તુલે શુક્રસ્ય તિથ્યંશાસ્ત્રિકોણમપરે સ્વભમ્ ।
શનેઃ કુમ્ભે નખાંશાશ્ચ  ત્રિકોણમપરે સ્વભમ્ ॥ ૫૪॥

ત્રિકોણાત્ સ્વાત્સુખસ્વાઽન્ત્યધીધર્માયુઃસ્વતુઙ્ગપાઃ ।
સુહૃદો રિપવશ્ચાન્યે સમાશ્ચોભયલક્ષણાઃ ॥ ૫૫॥

દશબન્ધ્વાયસહજસ્વાન્ત્યસ્થાસ્તુ પરસ્પરમ્ ।
તત્કાલે મિત્રતાં યાન્તિ રિપવોઽન્યત્ર સંસ્થિતાઃ ॥ ૫૬॥

તત્કાલે ચ નિસર્ગે ચ મિત્રં ચેદધિમિત્રકમ્ ।
મિત્રં મિત્રસમત્વે તુ શત્રુઃ શત્રુસમત્વકે ॥ ૫૭॥

સમો મિત્રરિપુત્વે તુ શત્રુત્વે ત્વધિશત્રુતા ।
એવં વિવિચ્ય દૈવજ્ઞો જાતકસ્ય ફલં વદેત્ ॥ ૫૮॥

સ્વોચ્ચે શુભં ફલં પૂર્ણં ત્રિકોણે પાદવર્જિતમ્ ।
સ્વર્ક્ષેઽર્ધં મિત્રગેહે તુ પાદમાત્રં પ્રકીર્તિતમ્ ॥ ૫૯॥

પાદાર્ધં સમભે પ્રોક્તં શૂન્યં નીચાસ્તશત્રુભે ।
તદ્વદ્દુષ્ટફલં બ્રૂયદ્ વ્યત્યયેન વિચક્ષણઃ ॥ ૬૦॥

ત્ર્યંશાઢ્યવિશ્વભાગૈશ્ચ ચતુર્ભિઃ સહિતો રવિઃ ।
ધૂમો નામ મહાદોષઃ સર્વકર્મવિનાશકઃ ॥ ૬૧॥

ધૂમો મણ્ડલતઃ શુદ્ધો વ્યતીપાતોઽત્ર દોષદઃ ।
સષડ્ભોઽત્ર વ્યતીપાતઃ પરિવેષોઽતિદોષકૃત્ ॥ ૬૨॥

પરિવેષશ્ચ્યુતશ્ચક્રાદિન્દ્રચાપસ્તુ દોષદઃ ।
વિત્ર્યંશાસ્યષ્ટિભાગાઢ્યશ્ચાપઃ કેતુખગોઽશુભઃ ॥ ૬૩॥

એકરાશિયુતઃ કેતુઃ સૂર્યતુલ્યઃ પ્રજાયતે ।
અપ્રકાશગ્રહાશ્ચૈતે પાપા દોષપ્રદાઃ સ્મૃતાઃ ॥ ૬૪॥

સૂર્યેન્દુલગ્નગેષ્વેષુ વંશાયુર્જ્ઞાનનાશનમ્ ।
ઇતિ ધૂમાદિદોષાણાં સ્થિતિઃ પદ્માસનોદિતા ॥ ૬૫॥

રવિવારાદિશન્યન્તં ગુલિકાદિ નિરૂપ્યતે ।
દિવસાનષ્ટધા ભક્ત્વા વારેશાદ્ ગણેયત્ ક્રમાત્ ॥ ૬૬॥

અષ્ટમોંઽશો નિરીશઃ સ્યાચ્છન્યંશો ગુલિકઃસ્મૃતઃ ।
રાત્રિમપ્યષ્ટધા કૃત્વા વારેશાત્ પઞ્ચમાદિતઃ ॥ ૬૭॥

ગણયેદષ્ટમઃ ખણ્ડો નિષ્પતિઃ પરિકીર્તિતઃ ।
શ્યંશો ગુલિકઃ પ્રોક્તો રવ્યંશઃ કાલસઞ્જ્ઞકઃ ॥ ૬૮॥

ભૌમાંશો મૃત્યુરાદિષ્ટો ગુર્વંશો યમઘણ્ટ્કઃ ।
સોમ્યાંશોઽર્ધપ્રહરકઃ સ્વસ્વદેશોદ્ભવઃ સ્ફુટઃ ॥ ૬૯॥

ગુલિકેષ્ટવશાલ્લગ્નં સ્ફુટં યત્ સ્વસ્વદેશજમ્ ।
ગુલિકં પ્રોચ્યતે તસ્માજ્જાતકસ્ય ફલં વદેત્ ॥ ૭૦॥

ભાંશપાદસમૈઃ પ્રાણૈશ્ચરાદ્યર્કત્રિકોણભાત્ ।
ઉદયાદિષ્ટકાલાન્તં યદ્ભં પ્રાણપદં હિ તત્ ॥ ૭૧॥

સ્વેષ્ટકાલં પલીકૃત્ય તિથ્યાપ્તં ભાદિકં ચ યત્ ।
ચરાગદ્વિભસંસ્થેઽર્કે ભાનૌ યુઙ્ નવમે સુતે ॥ ૭૨॥

સ્ફુટં પ્રાણપદાખ્યં તલ્લગ્નં જ્ઞેયં દ્વિજોત્તમ ।
લગ્નાદ્ દ્વિકોણે તુર્યે ચ રાજ્યે પ્રાણપદં તદા ॥ ૭૩॥

શુભં જન્મ વિજાનીયાત્તથૈવૈકાદશેઽપિ ચ ।
અન્યસ્થાને સ્થિતં ચેત્ સ્યાત્ તદા જન્માશુભં વદેત્ ॥ ૭૪॥

## અથ રાશિસ્વરૂપાધ્યાયઃ ॥ ૪॥

અહોરાત્રસ્ય પૂર્વાન્ત્યલોપાદ્ હોરાઽવશિષ્યતે ।
તસ્ય વિજ્ઞાનમાત્રેણ જાતકર્મફલં વદેત્ ॥ ૧॥

યદવ્યક્તાત્મકો વિષ્ણુઃ કાલરૂપો જનાર્દનઃ ।

તસ્યાઙ્ગાનિ નિબોધ ત્વં ક્રમાન્મેષાદિરાશ્યઃ ॥ ૨॥

મેષો વૃષશ્ચ મિથુનઃ કર્કસિંહકુમારિકાઃ ।
તુલાલિઽશ્ચ ધનુર્નક્રે કુમ્ભો મીનસ્તતઃ પરમ્ ॥ ૩॥

શીર્ષાનને તથા બાહૂ હૃત્ક્રોડકટિબસ્તયઃ ।
ગુહ્યોરુયુગલે જાનુયુગ્મે વૈ જઙ્ઘકે તથા ॥ ૪॥

ચરનૌ દ્વૌ તથા મેષાત્ જ્ઞેયાઃ શીર્ષાદયઃ ક્રમાત્ ।
ચરસ્થિરદ્વિસ્વભાવાઃ ક્રૂરાક્રૂરૌ નરસ્ત્રિયૌ ॥ ૫॥

પિત્તાનિલત્રિધાત્વૈક્યશ્લેષ્મિકાશ્ચ ક્રિયાદયઃ ।
રક્તવર્ણો બૃહદ્ગાત્રશ્ચતુષ્પાદ્રાત્રિવિક્રમી ॥ ૬॥

પૂર્વવાસી નૃપજ્ઞાતિઃ શૈલચારી રજોગુણી ।
પૃષ્ઠોદયી પાવકી ચ મેષરાશિઃ કુજાધિપઃ ॥ ૭॥

શ્વેતઃ શુક્રાધિપો દીર્ઘશ્ચતુષ્પાચ્છર્વરીબલી ।
યામ્યેટ્ ગ્રામ્યો વણિગ્ભૂમિરજઃ પૃષ્ઠોદયો વૃષઃ ॥ ૮॥

શીર્ષોદયી નૃમિથુનં સગદં ચ સવીણકમ્ ।
પ્રત્યગ્વાયુર્દ્વિપાદ્રાત્રિબલી ગ્રામવ્રજોઽનિલી ॥ ૯॥

સમગાત્રો હરિદ્વિર્ણો મિથુનાખ્યો બુધાધિપઃ ।
પાટલો વનચારી ચ બ્રાહ્મણો નિશિ વીર્યવાન્ ॥ ૧૦॥

બહુપાદચરઃ સ્થૌલ્યતનુઃ સત્ત્વગુણી જલી ।
પૃષ્ઠોદયી કર્કરાશિર્મૃગાઙ્કાઽધિપતિઃ સ્મૃતઃ ॥ ૧૧॥

સિંહઃ સૂર્યાધિપઃ સત્ત્વી ચતુષ્પાત્ ક્ષત્રિયો વની ।
શીર્ષોદયી બૃહદ્ગાત્રઃપાણ્ડુઃ પૂર્વેડ્ દ્યુવીર્યવાન્ ॥ ૧૨॥

પાર્વતીયાથ કન્યાખ્યા રાશિર્દિનબલાન્વિતા ।
શીર્ષોદયા ચ મધ્યાઙ્ગા દ્વિપાદ્યામ્યચરા ચ સા ॥ ૧૩॥

સા સસ્યદહના વૈશ્યા ચિત્રવર્ણા પ્રભઞ્જિની ।
કુમારી તમસા યુક્તા બાલભાવા બુધાધિપા ॥ ૧૪॥

શીર્ષોદયી દ્યુવીર્યાઢ્યસ્તુલઃ કૃષ્ણો રજોગુણી ।
પશ્ચિમો ભૂચરો ઘાતી શૂદ્રો મધ્યતનુર્દ્વિપાત્ ॥ ૧૫॥

શુક્રાઽધિપોઽથ સ્વલ્પાઙ્ગો બહુપાદ્બ્રાહ્મણો બિલી ।
સૌમ્યસ્થો દિનવીર્યાઢ્યઃ પિશઙ્ગો જલભૂવહઃ ॥ ૧૬॥

રોમસ્વાઢ્યોઽતિતીક્ષ્ણાગ્રો વૃશ્ચિકશ્ચ કુજાધિપઃ ।
પૃષ્ઠોદયી ત્વથ ધનુર્ગુરુસ્વામી ચ સાત્ત્વિકઃ ॥ ૧૭॥

પિઙ્ગલો નિશિવીર્યાઢ્યઃ પાવકઃ ક્ષત્રિયો દ્વિપાત્ ।
આદાવન્તે ચતુષ્પાદઃ સમગાત્રો ધનુર્ધરઃ ॥ ૧૮॥

પૂર્વસ્થો વસુધાચારી તેજસ્વી બ્રહ્મણા કૃતઃ ।
મન્દાધિપસ્તમી ભૌમી યામ્યેટ્ ચ નિશિ વીર્યવાન્ ॥ ૧૯॥

પૃષ્ઠોદયી બૃહદ્ગાત્રઃ કર્બુરો વનભૂચરઃ ।
આદૌ ચતુષ્પદોન્તે તુ વિપદો જલગો મતઃ ॥ ૨૦॥

કુમ્ભઃ કુમ્ભી નરો બભ્રુવર્ણો મધ્યતનુર્દ્વિપાત્ ।
દ્યુવીર્યો જલમધ્યસ્થો વાતશીર્ષોદયી તમઃ ॥ ૨૧॥

શૂદ્રઃ પશ્ચિમદેશસ્ય સ્વામી દૈવાકરિઃ સ્મૃતઃ ।
મીનૌ પુચ્છાસ્યસંલગ્નૌ મીનરાશિર્દિવાબલી ॥ ૨૨॥

જલી સત્ત્વગુણાઢ્યશ્ચ સ્વસ્થો જલચરો દ્વિજઃ ।
અપદો મધ્યદેહી ચ સૌમ્યસ્થો હ્યુભયોદયી ॥ ૨૩॥

સુરાચાર્યાધિપશ્ચેતિ રાશીનાં ગદિતા ગુણાઃ ।
ત્રિંશદ્ભાગાત્મકાનાં ચ સ્થૂલસૂક્ષ્મફલાય ચ ॥ ૨૪॥

અથાતઃ સમ્પ્રવક્ષ્યામિ શ઼ૃણુષ્વ મુનિપુઙ્ગવ ।
જન્મલગ્નં ચ સંશોધ્ય નિષેકં પરિશોધયેત્ ॥ ૨૫॥

તદહં સમ્પ્રવક્ષ્યામિ મૈત્રેય ત્વં વિધારય ।
જન્મલગ્નાત્ પરિજ્ઞાનં નિષેકં સર્વજન્તુ યત્ ॥ ૨૬॥

યસ્મિન્ ભાવે સ્થિતો મન્દસ્તસ્ય માન્દેર્યદન્તરમ્ ।
લગ્નભાગ્યાન્તરં યોજ્યં યચ્ચ રાશ્યાદિ જાયતે ॥ ૨૭॥

માસાદિ તન્મિતં જ્ઞેયં જન્મતઃ પ્રાક્ નિષેકજમ્ ।
યદ્યદૃશ્યદલેઙ્ગેશસ્તદેન્દોર્ભુક્તભાગયુક્ ॥ ૨૮॥

તત્કાલે સાધયેલ્લગ્નં શોધયેત્ પૂર્વવત્તનુમ્ ।
તસ્માચ્છુભાશુભં વાચ્યં ગર્ભસ્થસ્ય વિશેષતઃ ॥ ૨૯॥

શુભાશુભં વદેત્ પિત્રોર્જીવનં મરણં તથા ।
એવં નિષેકલગ્નેન સમ્યગ્ જ્ઞેયં સ્વકલ્પનાત્ ॥ ૩૦॥

## અથ વિશેષલગ્નાધ્યાયઃ ॥ ૫॥

અથાહં સમ્પ્રવક્ષ્યામિ તવાગ્રે દ્વિજસત્તમ ।
ભાવહોરાઘટીસઞ્જ્ઞલગ્નાનીતિ પૃથક્ પૃથક્ ॥ ૧॥

સૂર્યોદયં સમારભ્ય ઘટિકાનાં તુ પઞ્ચકમ્ ।
પ્રયાતિ જન્મપર્યન્તં ભાવલગ્નં તદેવ હિ ॥ ૨॥

ઇષ્ટં ઘટ્યાદિકં ભક્ત્વા પઞ્ચભિર્ભાદિકં ફલમ્ ।
યોજ્યમૌદયિકે સૂર્યે ભાવલગ્નં સ્ફુટં ચ તત્ ॥ ૩॥

તથા સાર્ધદ્વિઘટિકામિતાદર્કોદયાદ્ દ્વિજ ।
પ્રયાતિ લગ્નં તન્નામ હોરાલગ્નં પ્રચક્ષતે ॥ ૪॥

ઇષ્ટઘટ્યાદિકં દ્વિઘ્નં પઞ્ચાપ્તં ભાદિકં ચ યત્ ।
યોજ્યમૌદયિકે ભાનૌ હોરાલગ્નં સ્ફુટં હિ તત્ ॥ ૫॥

કથયામિ ઘટીલગ્નં શ◌ૃનુ ત્વં દ્વિજસત્તમ ।
સૂર્યોદયત્ સમારભ્ય જન્મકાલાવધિ ક્રમાત્ ॥ ૬॥

એકૈકઘટિકામાનાત્ લગ્નં યદ્યાતિ ભાદિકમ્ ।
તદેવ ઘટિકાલગ્નં કથિતં નારદાદિભિઃ ॥ ૭॥

રાશયસ્તુ ઘટીતુલ્યાઃ પલાર્ધપ્રમિતાંશકાઃ ।
યોજ્યમૌદયિકે ભનૌ ઘટીલગ્નં સ્ફુટં હિ તત્ ॥ ૮॥

ક્રમાદેષાં ચ લગ્નાનાં ભાવકોષ્ઠં પૃથક્ લિખેત્ ।
યે ગ્રહા યત્ર ભે તત્ર તે સ્થાપ્યા રાશિલગ્નવત્ ॥ ૯॥

વર્ણદાખ્યદશાં ભાનાં કથયામ્યથ તેઽગ્રતઃ ।
યસ્ય વિજ્ઞાનમાત્રેણ વદેદાયુર્ભવં ફલમ્ ॥ ૧૦॥

ઓજલગ્નપ્રસૂતાનાં મેષાદેર્ગણયેત્ ક્રમાત્ ।
સમલગ્નપ્રસૂતાનામ્ મીનાદેરપસવ્યતઃ ॥ ૧૧॥

મેષમીનાદિતો જન્મલગ્નાન્તં ગણયેત્ સુધીઃ ।
તથૈવ હોરાલગ્નાન્તં ગણયિત્વા તતઃ પરમ્ ॥ ૧૨॥

ઓજત્વેન સમત્વેન સજાતીયે ઉભે યદિ ।
તર્હિ સઙ્ખ્યે યોજયીત વૈજાત્યે તુ વિયોજયેત્ ॥ ૧૩॥

મેષમીનાદિતઃ પશ્ચાદ્યો રાશિઃ સ તુ વર્ણદઃ ।
એતત્પ્રયોજનં વક્ષ્યે શ‍ૃણુ ત્વં દ્વિજપુઙ્ગવઃ ।
હોરાલગ્નભયોર્નેયા સબલાદ્વર્ણદા દશા ॥ ૧૪॥

યત્સઙ્ખ્યો વર્ણદો લગ્નાત્ તત્તત્સઙ્ખ્યાક્રમેણ તુ ।
ક્રમવ્યુત્ક્રમભેદેન દશા સ્યાદોજયુગ્મયો ॥ ૧૫॥

પાપદૃષ્ટિઃ પાપયોગો વર્ણદસ્ય ત્રિકોણકે ।
યદિ સ્યાત્ તર્હિ તદ્રાશિપર્યન્તં તસ્ય જીવનમ્ ॥ ૧૬॥

રુદ્રશૂલે યથૈવાયુર્મરણાદિ નિરૂપ્યતે ।
તથૈવ વર્ણદસ્યાપિ ત્રિકોણે પાપસઙ્ગમે ॥ ૧૭॥

વર્ણદાદપિ ભો વિપ્ર લગ્નવચ્ચિન્તયેત્ ફલમ્ ।
વર્ણદાત્ સપ્તમાદ્ ભાવાત્ કલત્રાયુર્વિચિન્તયેત્ ॥ ૧૮॥

એકાદશાદગ્રજસ્ય તૃતીયાત્તુ યવીયસઃ ।
સુતસ્ય પઞ્ચમે વિદ્યાન્માતુશ્ચતુર્થભાવતઃ ॥ ૧૯॥

પિતુશ્ચ નવમાદ્ ભાવાદાયુરેવં વિચિન્તયેત્ ।
શૂલરાશિદશાયાં વૈ પ્રબલાયામરિષ્ટકમ્ ॥ ૨૦॥

એવં તન્વાદિભાવાનાં કર્તવ્યા વર્ણદા દશા ।
પૂર્વવચ્ચ ફલં જ્ઞેયં દેહિનાં ચ શુભાશુભમ્ ॥ ૨૧॥

ગ્રહાણાં વર્ણદા નૈવ રાશીનાં વર્ણદા દશા ।
કૃત્વાર્કધા રાશિદશાં ક્રમાદન્તર્દશાં વદેત્ ॥ ૨૨॥

એવમન્તર્દશાદિં ચ કૃત્વા તેન ફલં વદેત્ ।
ક્રમવ્યુત્ક્રમભેદેન લિખેદન્તર્દશામપિ ॥ ૨૩॥

સ્વસ્વદેશોદ્ભવં લગ્નં જન્મલગ્નમિહોચ્યતે ।
ભાવહોરાદિલગ્નાનાં સર્વત્રૈવ સમક્રિયા ॥ ૨૪॥

# અથ ષોડશવર્ગાધ્યાયઃ ॥ ૬॥

શ્રુતા ગ્રહગુણાસ્ત્વત્તસ્તથા રાશિગુણ મુને ।
શ્રોતુમિચ્છામિ ભાવાનાં ભેદાંસ્તાન્ કૃપયા વદ ॥ ૧॥

વર્ગાન્ ષોડશ યાનાહ બ્રહ્મા લોકપિતામહઃ ।
તાનહં સમ્પ્રવક્ષ્યામિ મૈત્રેય શ્રૂયતામિતિ ॥ ૨॥

ક્ષેત્રં હોરા ચ દ્રેષ્કાણસ્તુર્યાંશઃ સપ્તમાંશકઃ ।
નવાંશો દશમાંશશ્ચ સૂર્યાંશઃ ષોડશાંશકઃ ॥ ૩॥

વિંશાંશો વેદવાહ્વંશો ભાંશસ્ત્રિંશાંશકસ્તતઃ ।
ખવેદાંશોઽક્ષવેદાંશઃ ષષ્ઠ્યંશશ્ચ તતઃ પરમ્ ॥ ૪॥

તત્ક્ષેત્રં તસ્ય ખેટસ્ય રાશેર્યો યસ્ય નાયકઃ ।
સૂર્યેન્દ્વોર્વિષમે રાશૌ સમે તદ્વિપરીતકમ્ ॥ ૫॥

પિતરશ્ચન્દ્રહોરેશા દેવાઃ સૂર્યસ્ય કીર્તિતાઃ ।
રાશેરર્દ્ધં ભવેદ્ધોરા તાશ્ચતુર્વિંશતિઃ સ્મૃતા ।
મેષાદિ તાસાં હોરાણાં પરિવૃત્તિદ્વયં ભવેત્ ॥ ૬॥

રાશિત્રિભાગાદ્રેષ્કાણાસ્તે ચ ષટ્ત્રિંશદીરિતાઃ ।
પરિવૃત્તિત્રયં તેષાં મેષાદેઃ ક્રમશો ભવેત્ ॥ ૭॥

સ્વપઞ્ચનવમાનાં ચ રાશીનાં ક્રમશશ્ચ તે ।
નારદાઽગસ્તિદુર્વાસા દ્રેષ્કાણેશાશ્ચરાદિષુ ॥ ૮॥

સ્વર્ક્ષાદિકેન્દ્રપતયસ્તુર્યાંશેશાઃ ક્રિયાદિષુ ।
સનકશ્ચ સનન્દશ્ચ કુમારશ્ચ સનાતનઃ ॥ ૯॥

સપ્તાંશપાસ્ત્વોજગૃહે ગણનીયા નિજેશતઃ ।
યુગ્મરાશૌ તુ વિજ્ઞેયાઃ સપ્તમર્ક્ષાદિનાયકાત્ ॥ ૧૦॥

ક્ષારક્ષીરૌ ચ દધ્યાજ્યૌ તથેક્ષુરસસમ્ભવઃ ।
મધ્યશુદ્ધજલાવોજે સમે શુદ્ધજલાદિકાઃ ॥ ૧૧॥

નવાંશેશાશ્ચરે તસ્માત્સ્થિરે તન્નવમાદિતઃ ।
ઉભયે તત્પઞ્ચમાદેરિતિ ચિન્ત્યં વિચક્ષણૈઃ ।
દેવા નૃરાક્ષસાશ્ચૈવ ચરાદિષુ ગૃહેષુ ચ ॥ ૧૨॥

દશમાંશાઃ સ્વતશ્ચૌજે યુગ્મે તન્નવમાત્ સ્મૃતાઃ ।
દશ પૂર્વાદિદિક્પાલા ઇન્દ્રાઽગ્નિયમરાક્ષસાઃ ॥ ૧૩॥

વરુણો મારુતશ્ચૈવ કુબેરેશાનપદ્મજાઃ ।
અનન્તશ્ચ ક્રમાદોજે સમે વા વ્યુત્ક્રમેણ તુ ॥ ૧૪॥

દ્વાદશાંશસ્ય ગણના તત્તત્ક્ષેત્રાદ્વિનિર્દિશેત્ ।
તેષામધીશાઃ ક્રમશો ગણેશાઽશ્વિયમાહયાઃ ॥ ૧૫॥

અજસિંહાઽશ્વિતો જ્ઞેયા ષોડશાંશાશ્ચરાદિષુ ।
અજવિષ્ણૂ હરઃ સૂર્યો હ્યોજે યુગ્મે પ્રતીપકમ્ ॥ ૧૬॥

અથ વિંશતિભાગાનામધિપા બ્રહ્મણોદિતાઃ ।
ક્રિયાચ્ચરે સ્થિરે ચાપાન્ મૃગેન્દ્રાદ્ દ્વિસ્વભાવકે ॥ ૧૭॥

કાલી ગૌરી જયા લક્ષ્મીવિજયા વિમલા સતી ।
તારા જ્વાલામુખી શ્વેતા લલિતા બગલામુખી ॥ ૧૮॥

પ્રત્યઙ્ગિરા શચી રૌદ્રી ભવાની વરદા જયા ।
ત્રિપુરા સુમુખી ચેતિ વિષમે પરિચિન્તયેત્ ॥ ૧૯॥

સમરાશૌ દયા મેધા છિન્નશીર્ષા પિશાચિની ।
ધૂમાવતી ચ માતઙ્ગી બાલા ભદ્રાઽરુણાનલા ॥ ૨૦॥

પિઙ્ગલા છુચ્છુકા ઘોરા વારાહી વૈષ્ણવી સિતા ।
ભુવનેશી ભૈરવી ચ મઙ્ગલા હ્યપરાજિતા ॥ ૨૧॥

સિદ્ધાંશકાનામધિપાઃ સિંહાદોજભગે ગ્રહે ।
કર્કદ્યુગ્મભગે ખેટે સ્કન્દઃ પર્શુધરોઽનલઃ ॥ ૨૨॥

વિશ્વકર્મા ભગો મિત્રો મયોઽન્તકવૃષધ્વજાઃ ।
ગોવિન્દો મદનો ભીમઃ સિંહાદૌ વિષમે ક્રમાત્ ।
કર્કાદૌ સમભે ભીમાદ્વિલોમેન વિચિન્તયેત્ ॥ ૨૩॥

ભાંશાધિપાઃ ક્રમાદ્દસ્રયમવહ્નિપિતામહાઃ ।
ચન્દ્રેશાદિતિજીવાહિપિતરો ભગસઞ્જ્ઞિતાઃ ॥ ૨૪॥

અર્યમાર્કત્વષ્ટૃમરુચ્છક્રાગ્નિમિત્રવાસવાઃ ।
નિરૃત્યુદકવિશ્વેઽજગોવિન્દો વસવોઽમ્બુપઃ ॥ ૨૫॥

તતોઽજપાદહિર્બુધ્ન્યઃ પૂષા ચૈવ પ્રકીર્તિતાઃ ।

નક્ષત્રેશાસ્તુ ભાંશેશા મેષાદિચરભક્રમાત્ ॥ ૨૬॥

ત્રિંશાંશેશાશ્ચ વિષમે કુજર્કીજ્યજ્ઞભાર્ગવાઃ ।
પઞ્ચપઞ્ચાષ્ટસપ્તાક્ષભાગાનાં વ્યત્યયાત્ સમે ॥ ૨૭॥

વહ્નિઃ સમીરશક્રૌ ચ ધનદો જલદસ્તથા ।
વિષમેષુ ક્રમાજ્જ્ઞેયાઃ સમરાશૌ વિપર્યયાત્ ॥ ૨૮॥

ચત્વારિંશદ્વિભાગાનામધિપા વિષમે ક્રિયાત્ ।
સમભે તુલતો જ્ઞેયાઃ સ્વસ્વાધિપસમન્વિતાઃ ॥ ૨૯॥

વિષ્ણુશ્ચન્દ્રો મરીચિશ્ચ ત્વષ્ટા ધાતા શિવો રવિઃ ।
યમો યક્ષશ્ચ ગન્ધર્વઃ કાલો વરુણ એવ ચ ॥ ૩૦॥

તથાક્ષવેદભાગાનામધિપાશ્ચરભે ક્રિયાત્ ।
સ્થિરે સિંહાદ્ દ્વિભેચાપાત્ વિધીશવિષ્ણવશ્ચરે ॥ ૩૧॥

ઈશાચ્યુતસુરજ્યેષ્ઠા વિષ્ણુકેશાઃ સ્થિરે દ્વિભે ।
દેવાઃ પઞ્ચદશાવૃત્ત્યા વિજ્ઞેયા દ્વિજસત્તમ ॥ ૩૨॥

રાશીન્ વિહાય ખેટસ્ય દ્વિઘ્નમંશાદ્યમર્કહૃત્ ।
શેષં સૈકં તદ્રાશેર્ભપાઃ ષષ્ટ્યંશપાઃ સ્મૃતાઃ ॥ ૩૩॥

ઘોરશ્ચ રાક્ષશો દેવઃ કુબેરો યક્ષકિન્નરૌ ।
ભ્રષ્ટઃ કુલઘ્નો ગરલો વહ્નિર્માયા પુરીષકઃ ॥ ૩૪॥

અપામ્પતિર્મરુત્વાંશ્ચ કાલઃ સર્પામૃતેન્દુકાઃ ।
મૃદુઃ કોમલહેરમ્બબ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૩૫॥

દેવાર્દ્રૌ કલિનાશશ્ચ ક્ષિતીશકમલાકરૌ ।
ગુલિકો મૃત્યુકાલશ્ચ દાવાગ્નિર્ઘોરસઞ્જ્ઞકઃ ॥ ૩૬॥

યમશ્ચ કણ્ટકસુધાઽમૃતૌ પૂર્ણનિશાકરઃ ।
વિષદગ્ધકુલાન્તશ્ચ મુખ્યો વંશક્ષયસ્તથા ॥ ૩૭॥

ઉત્પાતકાલસૌમ્યાખ્યાઃ કોમલઃ શીતલાભિધઃ ।
કરાલદંષ્ટ્રચન્દ્રાસ્યૌ પ્રવીણઃ કાલપાવકઃ ॥ ૩૮॥

દણ્ડભૃન્નિર્મલઃ સૌમ્યઃ ક્રૂરોઽતિશીતલોઽમૃતઃ ।
પયોધિભ્રમણાખ્યૌ ચ ચન્દ્રરેખા ત્વયુગ્મપાઃ ॥ ૩૯॥

સમે ભે વ્યત્યયાજ્જ્ઞેયાઃ ષષ્ટ્યંશેશાઃ પ્રકીર્તિતાઃ ।
ષષ્ટ્યાંશસ્વામિનસ્ત્વોજે તદીશાદવ્યત્યયઃ સમે ॥ ૪૦॥

શુભષષ્ટ્યંશસંયુક્તા ગ્રહાઃ શુભફલપ્રદાઃ ।
ક્રૂરષષ્ટ્યંશસંયુક્તા નાશયન્તિ ખચારિણઃ ॥ ૪૧॥

વર્ગભેદાનહં વક્ષ્યે મૈત્રેય ત્વં વિધારય ।
ષડ્વર્ગાઃ સપ્તવર્ગાશ્ચ દિગ્વર્ગા નૃપવર્ગકાઃ ॥ ૪૨॥

ભવન્તિ વર્ગસંયોગે ષડવર્ગે કિંશુકાદયઃ ।
દ્વાભ્યાં કિંશુકનામા ચ ત્રિભિર્વ્યઞ્જનમુચ્યતે ॥ ૪૩॥

ચતુર્ભિશ્ચામરાખ્યં ચ છત્રં પઞ્ચભિરેવ ચ ।
ષડ્ભિઃ કુણ્ડલયોગઃ સ્યાન્મુકુટાખ્યં ચ સપ્તભિઃ ॥ ૪૪॥

સપ્તવર્ગેઽથ દિગ્વર્ગે પારિજાતાદિસઞ્જ્ઞકાઃ ।
પારિજાતં ભવેદ્દ્વાભ્યામુત્તમં ત્રિભિરુચ્યતે ॥ ૪૫॥

ચતુર્ભિર્ગોપુરાખ્યં સયાચ્છરૈઃ સિંહાસનં તથા ।
પારાવતં ભવેત્ ષડ્ભિર્દેવલોકં ચ સપ્તભિઃ ॥ ૪૬॥

વસુભિર્બ્રહ્મલોકાખ્યં નવભિઃ શક્રવાહનમ્ ।
દિગ્ભિઃ શ્રીધામયોગઃ સ્યાદથ ષોડશવર્ગકે ॥ ૪૭॥

ભેદકં ચ ભવેદ્દ્વાભ્યાં ત્રિભિઃ સ્યાત્ કુમુમાખ્યકમ્ ।
ચતુર્ભિર્નાગપુષ્પં સ્યાત્ પઞ્ચભિઃ કન્દુકાહ્વયમ્ ॥ ૪૮॥

કેરલાખ્યં ભવેત્ ષડ્ભિઃ સપ્તભિઃ કલ્પવૃક્ષકમ્ ।
અષ્ટભિશ્ચન્દનવનં નવભિઃ પૂર્ણચન્દ્રકમ્ ॥ ૪૯॥

દિગ્ભિરુચ્ચૈઃશ્રવા નામ રુદ્રૈર્ધન્વન્તરિર્ભવેત્ ।
સૂર્યકાન્તં ભવેદ્ સૂર્યૈર્વિશ્વૈઃ સ્યાદ્વિદ્રુમાખ્યકમ્ ॥ ૫૦॥

શક્રસિંહાસનં શક્રૈર્ગોલોકં તિથિભિર્ભવેત્ ।
ભૂપૈઃ સ્રીવલ્લભાખ્યં સ્યાદ્વર્ગા ભેદૈરુદાહૃતાઃ ॥ ૫૧॥

સ્વોચ્ચમૂલત્રિકોણસ્વભવનાધિપતેઃ શુભાઃ ।
સ્વારુઢાત્ કેન્દ્રનાથાનાં વર્ગા ગ્રાહ્યાઃ સુધીમતા ॥ ૫૨॥

અસ્તઙ્ગતા ગ્રહજિતા નીચગા દુર્બલાશ્ચ યે ।
શયનાદિગતાસ્તેભ્ય ઉત્પન્ના યોગનાશકાઃ ॥ ૫૩॥

## અથ વર્ગવિવેકાધ્યાયઃ ॥ ૭॥

અથ ષોડશવર્ગેષુ વિવેકં ચ વદામ્યહમ્ ।
લગ્ને દેહસ્ય વિજ્ઞાનં હોરાયાં સમ્પદાદિકમ્ ॥ ૧॥

દ્રેષ્કાણે ભ્રાતૃજં સૌખ્યં તુર્યાંશે ભાગ્યચિન્તનમ્ ।
પુત્રપૌત્રાદિકાનાં વૈ ચિન્તનં સપ્તમાંશકે ॥ ૨॥

નવમાંશે કલત્રાણાં દશમાંશે મહત્ફલમ્ ।
દ્વાદશાંશે તથા પિત્રોશ્ચિન્તનં ષોડશાંશકે ॥ ૩॥

સુખાઽસુખસ્ય વિજ્ઞાનં વાહનાનાં તથૈવ ચ ।
ઉપાસનાયા વિજ્ઞાનં સાધ્યં વિંશતિભાગકે ॥ ૪॥

વિદ્યાયા વેદબાહ્વંશે ભાંશે ચૈવ બલાઽબલમ્ ।
ત્રિંશાંશકે રિષ્ટફલં ખવેદાંશે શુભાઽશુભમ્ ॥ ૫॥

અક્ષવેદાંશકે ચૈવ ષષ્ટ્યંશેઽખિલમીક્ષયેત્ ।
યત્ર કુત્રાપિ સમ્પ્રાપ્તઃ ક્રૂરષષ્ટ્યંશકાધિપઃ ॥ ૬॥

તત્ર નાશો ન સન્દે હો ગર્ગાદીનાં વચો યથા ।
યત્ર કુત્રાપિ સમ્પ્રાપ્તઃ કલાંશાધિપતિઃ શુભઃ ॥ ૭॥

તત્ર વૃદ્ધિશ્ચ પુષ્ટિશ્ચ ગર્ગાદિનાં વચો યથા ।
ઇતિ ષોડશવર્ગાણાં ભેદાસ્તે પ્રતિપાદિતાઃ ॥ ૮॥

ઉદયાદિષુ ભાવેષુ ખેટસ્ય ભવનેષુ વા ।
વર્ગવિંશોપકં વીક્ષ્ય જ્ઞેયં તેષાં શુભાઽશુભમ્ ॥ ૯॥

અથાતઃ સમ્પ્રવક્ષ્યામિ વર્ગવિંશોપકં બલમ્ ।
યસ્ય વિજ્ઞાનમાર્તેણ વિપાકં દૃષ્ટિગોચરમ્ ॥ ૧૦॥

ગૃહવિંશોપકં વીક્ષ્યં સૂર્યાદીનાં ખચારિણામ્ ।
સ્વગૃહોચ્ચે બલં પૂર્ણં શૂન્યં તત્સપ્તમસ્થિતે ॥ ૧૧॥

ગ્રહસ્થિતિવશાજ્જ્ઞેયં દ્વિરાશ્યધિપતિસ્તથા ।
મધ્યેઽનુપાતતો જ્ઞેયં ઓજયુગ્મર્ક્ષભેદતઃ ॥ ૧૨॥

સૂર્યહોરાફલં દદ્યુર્જીવાર્કવસુધાત્મજાઃ ।
ચન્દ્રાસ્ફુજિદર્કપુત્રાશ્ચન્દ્રહોરાફલપ્રદાઃ ॥ ૧૩॥

ફલદ્વયં બુધો દદ્યાત્ સમે ચાન્દ્રં તદન્યકે ।
રવેઃ ફલં સ્વહોરાદૌ ફલહીનં વિરામકે ॥ ૧૪॥

મધ્યેઽનુપાતાત્ સર્વત્ર દ્રેષ્કાણેઽપિ વિચિન્તયેત્ ।
ગૃહવત્ તુર્યભાગેપિ નવાંશાદાવપિ સ્વયમ્ ॥ ૧૫॥

સૂર્યઃ કુજફલં ધત્તે ભાર્ગવસ્ય નિશાપતિઃ ।
ત્રિંશાંશકે વિચિન્ત્યૌવમત્રાપિ ગૃહવત્ સ્મૃતમ્ ॥ ૧૬॥

લગ્નહોરાદૃકાણાઙ્કભાગસૂર્યકા ઇતિ ।
ત્રિંશાંશકશ્ચ ષડ્વર્ગા અત્ર વિંશોપકાઃ ક્રમાત્ ॥ ૧૭॥

રમનેત્રાબ્ધિપઞ્ચાશ્વિભૂમયઃ સપ્તવર્ગકે ।
સસપ્તમાંશકે તત્ર વિશ્વકાઃ પઞ્ચ લોચનમ્ ॥ ૧૮॥

ત્રયઃ સાર્દ્ધં દ્વયં સાર્દ્ધવેદા દ્વૌ રાત્રિનાયકઃ ।
સ્થૂલં ફલં ચ સંસ્થાપ્ય તત્સૂક્ષ્મં ચ તતસ્તતઃ ॥ ૧૯॥

દશવર્ગાં દિગંશાઢ્યાઃ કલાંશાઃ ષષ્ટિભાગકાઃ ।
ત્રયં ક્ષેત્રસ્ય વિજ્ઞેયાઃ પઞ્ચષષ્ટ્યંશકસ્ય ચ ॥ ૨૦॥

સાર્દ્ધૈકભાગાઃ શેષાણાં વિશ્વકાઃ પરિકીર્તિતા ।
અથ વક્ષ્યે વિશેષેણ બલં વિંશોપકાહ્વયમ્ ॥ ૨૧॥

ક્રમાત્ ષોડશવર્ગાણાં ક્ષેત્રાદીનાં પૃથક્ પૃથક્ ।
હોરાત્રિંશાંશદૃક્કાણે કુચન્દ્રશશિનઃ ક્રમાત્ ॥ ૨૨॥

કલાંશસ્ય દ્વયં જ્ઞેયં ત્રયં નન્દાંશકસ્ય ચ ।
ક્ષેત્રે સાર્દ્ધં ચ ત્રિતયં વેદાઃ ષષ્ટ્યંશકસ્ય હિ ॥ ૨૩॥

અર્દ્ધમર્ધં તુ શેષાણાં હ્યેતત્ સ્વીયમુદાહૃતમ્ ।
પૂર્ણં વિંશોપકં વિંશો ધૃતિઃ સ્યાદધિમિત્રકે ॥ ૨૪॥

મિત્રે પઞ્ચદશ પ્રોક્તં સમે દશ પ્રકીર્તિતમ્ ।
શત્રૌ સપ્તાધિશત્રૌ ચ પઞ્ચવિંશોપકં ભવેત્ ॥ ૨૫॥

વર્ગવિશ્વાઃ સ્વવિશ્વઘ્નાઃ પુનર્વિંશતિભાજિતાઃ ।
વિશ્વાફલોપયોગ્યં તત્પઞ્ચોનં ફલદો ન હિ ॥ ૨૬॥

તદૂર્ધ્વં સ્વલ્પફલદં દશોર્ધ્વં મધ્યમં સ્મૃતમ્ ।
તિથ્યૂર્ધ્વં પૂર્ણફલદં બોધ્યં સર્વં ખચારિણામ્ ॥ ૨૭॥

અથાઽન્યદપિ વક્ષ્યેઽહં મૈત્રેય ત્વં વિધારય ।
ખેટાઃ પૂર્ણફલં દદ્યુઃ સૂર્યાત્ સપ્તમકે સ્થિતાઃ ॥ ૨૮॥

ફલાભાવં વિજાનીયાત્ સમે સૂર્યનભશ્ચરે ।
મધ્યેઽનુપાતાત્ સર્વત્ર હ્યુદયાસ્તવિંશોપકાઃ ॥ ૨૯॥

વર્ગવિંશોપકં જ્ઞેયં ફલમસ્ય દ્વિજર્ષભ ।
યચ્ચ યત્ર ફલં બુદ્ધ્વા તત્ફલં પરિકીર્તિતમ્ ॥ ૩૦॥

વર્ગવિંશોપકં ચાદાવુદયાસ્તમતઃ પરમ્ ।
પૂર્ણં પૂર્ણેતિપૂર્નંસ્યાત્ સર્વદૈવં વિચિન્તયેત્ ॥ ૩૧॥

હીનં હીનેતિહીનં સ્યાત્ સ્વલ્પેલ્પાત્યલ્પકં સ્મૃતમ્ ।
મધ્યં મધ્યેતિમધ્યં સ્યાદ્યાવત્તસ્ય દશાસ્થિતિઃ ॥ ૩૨॥

અથાઽન્યદપિ વક્ષ્યામિ મૈત્રેય શ઼ૃણુ સુવ્રત્ ।
લગ્નતુર્યાસ્તવિયતાં કેન્દ્રસઙ્જ્ઞા વિશેષતઃ ॥ ૩૩॥

દ્વિપઞ્ચરન્ધ્રલાભાનાં જ્ઞેયં પણફરાભિધમ્ ।
ત્રિષષ્ઠભાગ્યરિષ્ફાનામાપોક્લિમમિતિ દ્વિજ ॥ ૩૪॥

લગ્નાત્ પઞ્ચમભાગ્યસ્ય કોણસઙ્જ્ઞા વિધીયતે ।
ષષ્ઠાષ્ટવ્યયભાવાનાં દુઃસઙ્જ્ઞાસ્ત્રિકસઙ્જ્ઞકાઃ ॥ ૩૫॥

ચતુરસ્રં તુર્યરન્ધ્રં કથયાન્તે દ્વિજોત્તમ ।
સ્વસ્થાદુપચયર્ક્ષાણિ ત્રિષડાયામ્બરાણિ હિ ॥ ૩૬॥

તનુર્ધનં ચ સહજો બન્ધુપુત્રારયસ્તથા ।
યુવતીરન્ધ્રધર્માખ્યકર્માલાભવ્યયાઃ ક્રમાત્ ॥ ૩૭॥

સંક્ષેપેણૈતદુદિતમન્યદ્ બુદ્ધ્યનુસારતઃ ।
કિઞ્ચિદ્વિશેષં વક્ષ્યામિ યથા બ્રહ્મમુખાચ્છ્રુતમ્ ॥ ૩૮॥

નવમેઽપિ પિતુર્જ્ઞાનં સૂર્યાચ્ચ નવમેઽથવા ।
યત્કિઞ્ચિદ્દશમે લાભે તત્સૂર્યાદ્દશમે ભવે ॥ ૩૯॥

તુર્યે તનૌ ધને લાભે ભાગ્યે યચ્ચિન્તનં ચ તત્ ।

ચન્દ્રાત્તુર્યે તનૌ લાભે ભાગ્યે તચ્ચિન્તયેદ્ ધ્રુવમ્ ॥ ૪૦॥

લગ્નાદ્ દુશ્ચિક્યભવને યત્કુજાદ્ધિક્રમેઽખિલમ્ ।
વિચાર્યં ષષ્ઠભાવસ્ય બુધાત્ ષષ્ઠે વિલોકયેત્ ॥ ૪૧॥

પુત્રસ્ય ચ ગુરોઃ પુત્રે જાયાયાઃ સપ્તમે ભૃગોઃ ।
અષ્ટમસ્ય વ્યયસ્યાપિ મન્દાન્મૃત્યૌ વ્યયે તથા ॥ ૪૨॥

યદ્ભાવાદ્યત્ફલં ચિન્ત્યં તદીશાત્તત્ફલં વિદુઃ ।
જ્ઞેયં તસ્ય ફલં તદ્ધિ તત્ર ચિન્ત્યં શુભાઽશુભમ્ ॥ ૪૩॥

## અથ રાશિદૃષ્ટિકથનાધ્યાયઃ ॥ ૮॥

અથ મેષાદિરાશીનાં ચરાદીનાં પૃથક્ પૃથક્ ।
દૃષ્ટિભેદં પ્રવક્ષ્યામિ શૃણુ ત્વં દ્વિજસત્તમ ॥ ૧॥

રાશયોઽભિમુખં વિપ્ર તથા પશ્યન્તિ પાર્શ્વભે ।
યથા ચરઃ સ્થિરાનેવં સ્થિરઃ પશ્યતિ વૈ ચરાન્ ॥ ૨॥

દ્વિસ્વભાવો વિનાઽઽત્માનં દ્વિસ્વભાવાન્ પ્રપશ્યતિ ।
સમીપસ્થં પરિત્યજ્ય ખેટાસ્તત્ર ગતાસ્તથા ॥ ૩॥

ચરેષુ સંસ્થિતાઃ ખેટાઃ પશ્યન્તિ સ્થિરસઙ્ગતાન્ ।
સ્થિરેષુ સંસ્થિતા એવં પશ્યન્તિ ચરસંસ્થિતાન્ ॥ ૪॥

ઉભયસ્થાસ્તુ સૂર્યાદ્યા પશ્યન્ત્યુભયસંસ્થિતાન્ ।
નિકટસ્થં વિના ખેટાઃ પશ્યન્તીત્યયમાગમઃ ॥ ૫॥

દૃષ્ટિચક્રમહં વક્ષ્યે યથાવદ્ બ્રહ્મણોદિતમ્ ।
તસ્ય વિન્યાસમાત્રેણ દૃષ્ટિભેદઃ પ્રકાશ્યતે ॥ ૬॥

પ્રાચિ મીષવૃષૌ લેખ્યૌ કર્કસિંહૌ તથોત્તરે ।
તુલાઽલી પશ્ચિમે વિપ્ર મૃગકુમ્ભૌ ચ દક્ષિણે ॥ ૭॥

ઈશકોણે તુ મિથુનં વાયવ્યે કન્યકાં તથા ।
નૌરૃત્યાં ચાપમાલિખ્ય વહ્નિકોણે ઝષં લિખેત્ ॥ ૮॥

એવં ચતુર્ભુજાકારં વૃત્તાકારમથાપિ વા ।
દૃષ્ટિચક્રં પ્રવિન્યસ્યૈવં તતો દૃષ્ટિં વિચારયેત્ ॥ ૯॥

## અથારિષ્ટાધ્યાયઃ ॥ ૯॥

આદૌ જન્માઙ્ગતો વિપ્ર રિષ્ટાઽરિષ્ટં વિચારયેત્ ।
તતસ્તન્વાદિભાવાનાં જાતકસ્ય ફલં વદેત્ ॥ ૧॥

ચતુર્વિંશતિવર્ષાણિ યાવદ્ ગચ્છન્તિ જન્મતઃ ।
જન્મારિષ્ટં તુ તાવત્ સ્યાદાયુર્દાયં ન ચિન્તયેત્ ॥ ૨॥

ષષ્ઠાષ્ટરિષ્ફગશ્ચન્દ્રઃ ક્રૂરૈઃ ખેટૈશ્ચ વીક્ષિતઃ ।
જાતસ્ય મૃત્યુદઃ સદ્યસ્ત્વષ્ટવર્ષૈઃ શુભેક્ષિતઃ ॥ ૩॥

શશિવન્મૃત્યુદાઃ સૌમ્યાશ્ચેદ્વક્રાઃ ક્રૂરવીક્ષિતાઃ ।
શિશોર્જાતસ્ય માસેન લગ્ને સૌમ્યવિવર્જિતે ॥ ૪॥

યસ્ય જન્મનિ ધીસ્થાઃ સ્યુઃ સૂર્યાર્કીન્દુકુજાભધાઃ ।
તસ્ય ત્વાશુ જનિત્રી ચ ભ્રાતા ચ નિધનં વ્રજેત્ ॥ ૫॥

પાપેક્ષિતો યુતો ભૌમો લગ્નગો ન શુભેક્ષિતઃ ।
મૃત્યુદસ્ત્વષ્ટમસ્થોઽપિ સૌરેણાર્કેણ વા યુતઃ ॥ ૬॥

ચન્દ્રસૂર્યગ્રહે રાહુશ્ચન્દ્રસૂર્યયુતો યદિ ।
સૌરિભૌમેક્ષિતં લગ્નં પક્ષમેકં સ જીવતિ ॥ ૭॥

કર્મસ્થાને સ્થિતઃ સૌરિઃ શત્રુસ્થાને કલાનિધિઃ ।
ક્ષિતિજઃ સપ્તમસ્થાને સહ માત્રા વિપદ્યતે ॥ ૮॥

લગ્ને ભાસ્કરપુત્રશ્ચ નિધને ચન્દ્રમા યદિ ।
તૃતીયસ્થો યદા જીવઃ સ યાતિ યમમન્દિરમ્ ॥ ૯॥

હોરાયાં નવમે સૂર્યઃ સપ્તમસ્થઃ શનૈશ્ચરઃ ।
એકાદશે ગુરુઃ શુક્રો માસમેકં સ જીવતિ ॥ ૧૦॥

વ્યયે સર્વે ગ્રહા નેષ્ટાઃ સૂર્યશુક્રેન્દુરાહવઃ ।
વિશેષાન્નાશકર્તારો દૃષ્ટ્યા વા ભઙ્ગકારિણઃ ॥ ૧૧॥

પાપાન્વિતઃ શશી ધર્મે દ્યૂનલગ્નગતો યદિ ।
શુભૈરવેક્ષિતયુતસ્તદા મૃત્યુપ્રદઃ શિશોઃ ॥ ૧૨॥

સન્ધ્યાયાં ચન્દ્રહોરાયાં ગણ્ડાન્તે નિધનાય વૈ ।

પ્રત્યેકં ચન્દ્રપાપૈશ્ચ કેન્દ્રગૈઃ સ્યાદ્વિનાશનમ્ ॥ ૧૩॥

રવેસ્તુ મણ્ડલાર્દ્ધાસ્તાત્ સાયં સંધ્યા ત્રિનાડિકા ।
તથૈવાર્દ્ધોદયાત્ પૂર્વં પ્રાતઃ સંધ્યા ત્રિનાડિકા ॥ ૧૪॥

ચક્રપૂર્વાપરાર્દ્ધેષુ ક્રૂરસૌમ્યેષુ કીટભે ।
લગ્નગે નિધનં યાતિ નાઽત્ર કાર્યા વિચારણા ॥ ૧૫॥

વ્યયશત્રુગતૈઃ ક્રૂરૈર્મૃત્યુદ્રવ્યગતૈરપિ ।
પાપમધ્યગતે લગ્ને સત્યમેવ મૃતિં વદેત્ ॥ ૧૬॥

લગ્નસપ્તમગૌ પાપૌ ચન્દ્રોઽપિ ક્રૂરસંયુતઃ ।
યદા નાવેક્ષિતઃ સૌમ્યૈઃ શીઘ્રાન્મૃત્યુર્ભવેત્તદા ॥ ૧૭॥

ક્ષીણે શશિનિ લગ્નસ્થે પાપૈઃ કેન્દ્રાષ્ટસંસ્થિતૈઃ ।
યો જાતો મૃત્યુમાપ્નોતિ સ વિપ્રેશ ન સંશયઃ ॥ ૧૮॥

પાપયોર્મધ્યગશ્ચન્દ્રો લગ્નાષ્ટાન્તિમસપ્તમઃ ।
અચિરાન્મૃત્યુમાપ્નોતિ યો જાતઃ સ શિશુસ્તદા ॥ ૧૯॥

પાપદ્વયમધ્યગતે ચન્દ્રે લગ્નસમાશ્રિતે ।
સપ્તાષ્ટમેન પાપેન માત્રા સહ મૃતઃ શિશુઃ ॥ ૨૦॥

શનૈશ્ચરાર્કભૌમેષુ રિષ્ફધર્માષ્ટમેષુ ચ ।
શભૈરવીક્ષ્યમાણેષુ યો જાતો નિધનઙ્ગતઃ ॥ ૨૧॥

યદ્દ્રેષ્કાણે ચ યામિત્રે યસ્ય સ્યાદ્દારુણો ગ્રહઃ ।
ક્ષીણચન્દ્રો વિલગ્નસ્થઃ સદ્યો હરતિ જીવિતમ્ ॥ ૨૨॥

આપોક્લિમસ્થિતાઃ સર્વે ગ્રહા બલવિવર્જિતાઃ ।
ષણ્માસં વા દ્વિમાસં વા તસ્યાયુઃ સમુદાહૃતમ્ ॥ ૨૩॥

ત્રિભિઃ પાપગ્રહૈઃ સૂતૌ ચન્દ્રમા યદિ દૃશ્યતે ।
માતૃનાશો ભવેત્તસ્ય શુભર્દૃષ્ટે શુભં વદેત્ ॥ ૨૪॥

ધને રાહુર્બુધઃ શુક્રઃ સૌરિઃ સૂર્યો યદા સ્થિતઃ ।
તસ્ય માતુર્ભવેન્મૃત્યુર્મૃતે પિતરિ જાયતે ॥ ૨૫॥

પાપાત્સપ્તમરન્ધ્રસ્થે ચન્દ્રે પાપસમન્વિતે ।
બલિભિઃ પાપકૈર્દૃષ્ટે જાતો ભવતિ માતૃહા ॥ ૨૬॥

ઉચ્ચસ્થો વાઽથ નીચસ્થઃ સપ્તમસ્થો યદારવિઃ ।
પાનહીનો ભવેદ્બાલ અજાક્ષીરેણ જીવતિ ॥ ૨૭॥

ચન્દ્રાચ્ચતુર્થગઃ પાપો રિપુક્ષેત્રે યદા ભવેત્ ।
તદા માતૃવધં કુર્યાત્ કેન્દ્રે યદિ શુભો ન ચેત્ ॥ ૨૮॥

દ્વાદશે રિપુભાવે ચ યદા પાપગ્રહો ભવેત્ ।
તદા માતુર્ભયં વિદ્યાચ્ચતુર્થે દશમે પિતુઃ ॥ ૨૯॥

લગ્ને ક્રૂરો વ્યયે ક્રૂરો ધને સૌમ્યસ્તથૈવ ચ ।
સપ્તમે ભવને ક્રૂરઃ પરિવારક્ષયઙ્કરઃ ॥ ૩૦॥

લગ્નસ્થે ચ ગુરૌ સૌરૌ ધને રાહૌ તૃતીયગે ।
ઇતિ ચેઞ્જન્મકાલે સ્યાન્માતા તસ્ય ન જીવતિ ॥ ૩૧॥

ક્ષીણચન્દ્રાત્ત્રિકોણસ્થૈઃ પાપૈઃ સૌમ્યવિવર્જિતૈઃ ।
માતા પરિત્યજેદ્બાલં ષણ્માસાચ્ચ ન સંશયઃ ॥ ૩૨॥

એકાંશકસ્થૌ મન્દારૌ યત્ર કુત્રસ્થિતૌ યદા ।
શશિકેન્દ્રગતૌ તૌ વા દ્વિમાતૃભ્યાં ન જીવતિ ॥ ૩૩॥

લગ્ને સન્દો મદે ભૌમઃ ષષ્ઠસ્થાને ચ ચન્દ્રમાઃ ।
ઇતિ ચેજ્જન્મકાલે સ્યાત્ પિતા તસ્ય ન જીવતિ ॥ ૩૪॥

લગ્ને જીવો ધને મન્દરવિભૌમબુધાસ્તથા ।
વિવાહસમયે તસ્ય બાલસ્ય મ્રિયતે પિતા ॥ ૩૫॥

સૂર્યઃ પાપેન સંયુક્તો હ્યથવા પાપમધ્યગઃ ।
સૂર્યાત્ સપ્તમગઃ પાપસ્તદા પિતૃવધો ભવેત્ ॥ ૩૬॥

સપ્તમે ભવને સૂર્યઃ કર્મસ્થો ભૂમિનન્દનઃ ।
રાહુર્વ્યયે ચ યુસ્યૈવ પિતા કષ્ટેન જીવતિ ॥ ૩૭॥

દશમસ્થો યદા ભૌમઃ શત્રુક્ષેત્રસમાશ્રિતઃ ।
મ્રિયતે તસ્ય જાતસ્ય પિતા શીઘ્રં ન સંશયઃ ॥ ૩૮॥

રિપુસ્થાને યદા ચન્દ્રો લગ્નસ્થાને શનૈશ્ચરઃ ।
કુજશ્ચ સપ્તમે સ્થાને પિતા તસ્ય ન જીવતિ ॥ ૩૯॥

ભૌમાંશકસ્થિતે ભાનૌ શનિના ચ નિરીક્ષિતે ।
પ્રાગ્જન્મનો નિવૃત્તિઃ સ્યાન્મૃત્યુર્વાઽપિ શિશોઃ પિતુઃ ॥ ૪૦॥

ચતુર્થે દશમે પાપૌ દ્વાદશે ચ યદા સ્થિતૌ ।
પિતરં માતરં હત્વા દેશાદ્દેશાન્તરં વ્રજેત્ ॥ ૪૧॥

રાહુજીવૌ રિપુક્ષેત્રે લગ્ને વાऽથ ચતુર્થકે ।
ત્રયોવિંશતિમે વર્ષે પુત્રસ્તાતં ન પશ્યતિ ॥ ૪૨॥

ભાનુઃ પિતા ચ જન્તૂનાં ચન્દ્રો માતા તથૈવ ચ ।
પાપદૃષ્ટિયુતો ભાનુઃ પાપમધ્યગતોऽપિ વા ॥ ૪૩॥

પિત્રરિષ્ટં વિજાનીયાચ્છિશોર્જાતસ્ય નિશ્ચિતમ્ ।
ભાનોઃ ષષ્ઠાષ્ટમર્ક્ષસ્થૈઃ પાપૈઃ સૌમ્યવિવર્જિતૈઃ ।
સુખભાવગતૈર્વાऽપિ પિત્રરિષ્ટં વિનિર્દિશેત્ ॥ ૪૪॥

એવં ચન્દ્રાત્ સ્થિતૈઃ પાપૈર્માતુ કષ્ટં વિચારયેત્ ।
બલાऽબલવિવેકેન કષ્ટં વા મૃત્યુમાદિશેત્ ॥ ૪૫॥

## અથાऽરિષ્ટભઙ્ગાધ્યાયઃ ॥ ૧૦॥

ઇત્યરિષ્ટં મયા પ્રોક્તં તદ્ભઙ્ગશ્ચાપિ કથ્યતે ।
યત્ સમાલોક્યં જાતાનાં રિષ્ટાऽરિષ્ટં વદેદ્બુધઃ ॥ ૧॥

એકોऽપિ જ્ઞાર્યશુક્રાણાં લગ્નાત્ કેન્દ્રગતો યદિ ।
અરિષ્ટં નિખિલં હન્તિ તિમિરં ભાસ્કરો યથા ॥ ૨॥

એક એવ બલી જીવો લગ્નસ્થો રિષ્ટસઞ્ચયમ્ ।
હન્તિ પાપક્ષયં ભક્ત્યા પ્રણામ ઇવ શૂલિનઃ ॥ ૩॥

એક એવ વિલગ્નેશઃ કેન્દ્રસંસ્થો બલાન્વિતઃ ।
અરિષ્ટં નિખિલં હન્તિ પિનાકી ત્રિપુરં યથા ॥ ૪॥

શુક્લપક્ષે ક્ષપાજન્મ લગ્ને સૌમ્યનિરીક્ષિતે ।
વિપરીતં કૃષ્ણપક્ષે તથારિષ્ટવિનાશનમ્ ॥ ૫॥

વ્યયસ્થાને યદા સૂર્યસ્તુલાલગ્ને તુ જાયતે ।
જીવેત્ સ શતવર્ષાણિ દીર્ઘાયુર્બાલકો ભવેત્ ॥ ૬॥

ગુરુભૌમૌ યદા યુક્તૌ ગુરુદૃષ્ટોऽથવા કુજઃ ।
હત્વાऽરિષ્ટમશેષં ચ જનન્યાઃ શુભકૃદ્ભવેત્ ॥ ૭॥

ચતુર્થદશમે પાપઃ સૌમ્યમધ્યે યદા ભવેત્ ।
પિતુઃ સૌખ્યકરો યોગઃ શુભૈઃ કેન્દ્રત્રિકોણગૈઃ ॥ ૮॥

સૌમ્યાન્તરગતૈઃ પાપૈઃ શુભૈઃ કેન્દ્રત્રિકોણગૈઃ ।
સદ્યો નાશયતેઽરિષ્ટં તદ્ભાવોત્થફલં ન તત્ ॥ ૯॥

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)
Proofread by Ahto Jarve, Ginda Lass, Abhisyanta Tejaswi

*Brihat Parashara Horashastram 1-10*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*